आश्वासय मृगेन्द्रेह यदि दृष्टस् त्वया नलः ॥३४॥
अथवारण्यनृपते नलं यदि न शंससि ।
मां खादय मृगश्रेष्ठ दुःखाद् अस्माद् विमोचय ॥३५॥
श्रुत्वाऽरण्ये विलपितं ममैष मृगराट् स्वयं ।
यात्येतां मृष्टसलिलाम् आपगां सागरङ्गमां ॥३६॥
इमं शिलोच्चयं पुण्यं शृङ्गैर् बहुभिर् उच्छ्रितैः ।
विराजद्भिर् दिविस्पृग्भिर् नैकवर्णैर् मनोहरैः ॥३७॥
नानाधातुसमाकीर्णं विविधोपलभूषितं ।
अस्यारण्यस्य महतः केतुभूतम् इवोत्थितं ॥३८॥
सिंहशार्दूलमातङ्गवराहर्क्षमृगायुतं ।
पतत्त्रिभिर् बहुविधैः समन्ताद् अनुनादितं ॥३९॥
किंशुकाशोकवकुलपुन्नागैर् उपशोभितं ।
कर्णिकारधवप्लक्षैः सुपुष्पैर् उपशोभितं ॥४०॥
सरिद्भिः सविहङ्गाभिः शिखरैश् च समाकुलं ।
गिरिराजम् इमं तावत् पृच्छामि नृपतिं प्रति ॥४१॥
भगवन्न् अचलश्रेष्ठ दिव्यदर्शन विश्रुत ।
शरण्य बहुकल्याण नमस् तेऽस्तु महीधर ॥४२॥
प्रणमे त्वाभिगम्याहं राजपुत्रीं निबोध मां ।
राज्ञः स्नुषां राजभार्यां दमयन्तीति विश्रुतां ॥४३॥
राजा विदर्भाधिपतिः पिता मम महारथः ।
भीमो नाम क्षितिपतिश् चातुर्वर्ण्यस्य रक्षिता ॥४४॥
राजसूयाश्वमेधानां क्रतूनां दक्षिणावतां ।
आहर्ता पार्थिवश्रेष्ठः पृथुचार्वञ्चितेक्षणः ॥४५॥
ब्रह्मण्यः साधुवृत्तश् च सत्यवाग् अनसूयकः ।
शीलवान् वीर्यसम्पन्नः पृथुश्रीर् धर्मविच् छुचिः ॥४६॥

Seeking here my exile husband, lonely, wretched, sorrow-driven,
Thou, O king of beasts, console me, if my Nala thou hast seen;
Or, O lord of all the forest, Nala if thou canst not show,
Best of savage beasts, devour me, from this misery set me free.
Hearing thus my lamentation, now does that fell king of beasts
Go towards the crystal river, flowing downward to the sea.—
Turn I to this holy mountain, crowned with many a lofty peak,
In its soul-exalting splendour, rising, many-hued, to heaven;
Full within of precious metals, rich with many a glowing gem,
Rising o'er this spreading forest like a banner broad and high,
Ranged by elephants and lions, tigers, boars, and bears, and stags;
Sweetly sounding all around me with the songs of many birds;
ll the trees of richest foliage, all the trees of stateliest height,
ll the flowers and golden fruitage on its crested summits wave,
Down its peaks in many a streamlet dip the water-birds their wings:
his, the monarch of all mountains, ask I of the king of men;
all-honoured Prince of Mountains, with thy heaven-ward soaring peaks,
efuge of the lost, most noble, thee, O Mountain, I salute;
salute thee, lowly bowing, I, the daughter of a king;
f a king the royal consort, of a king's son I the bride.
f Vidarbha the great sovereign, mighty hero is my sire,
amed the lord of earth, king Bhíma, of each caste the guardian he;
f the holy Aśvamedha, of the regal sacrifice,
e the offerer, best of monarchs, known by large and lustrous eyes.
ous, and of life unblemished, true in word, of generous speech,
ffable, courageous, prosperous, skilled in every duty, pure.

सम्यग्गोप्ता विदर्भाणां निर्जितारिगणः प्रभुः ।
तस्य मां विद्धि तनयां भगवंस् त्वाम् उपस्थितां ॥४७॥
निषधेषु महाराजः श्वशुरो मे नरोत्तमः ।
गृहीतनामा विख्यातो वीरसेन इति स्म ह ॥४८॥
तस्य राज्ञः सुतो वीरः श्रीमान् सत्यपराक्रमः ।
क्रमप्राप्तं पितुः स्वं यो राज्यं समनुशास्ति ह ॥४९॥
नलो नामारिहा श्यामः पुण्यश्लोक इति श्रुतः ।
ब्रह्मण्यो वेदविद् वाग्मी पुण्यकृत् सोमपोऽग्निमान् ॥५०॥
यष्टा दाता च योद्धा च सम्यक्चैव प्रशासिता ।
तस्य माम् अचलश्रेष्ठ विद्धि भार्याम् इहागतां ॥५१॥
त्यक्तश्रियं भर्तृहीनाम् अनाथां व्यसनान्वितां ।
अन्वेषमाणां भर्तारं तं वै नरवरोत्तमं ॥५२॥
खम् उल्लिखद्भिर् एतैर् हि त्वया शृङ्गशतैर् नृपः ।
कच्चिद् दृष्टोऽचलश्रेष्ठ वनेऽस्मिन् दारुणे नलः ॥५३॥
गजेन्द्रविक्रमो धीमान् दीर्घबाहुर् अमर्षणः ।
विक्रान्तः सत्यवाग् वीरो भर्ता मम महायशाः ॥५४॥
निषधानाम् अधिपतिः कच्चिद् दृष्टस् त्वया नलः ।
किं मां विलपन्तीम् एकां पर्वतश्रेष्ठ विह्वलां ॥५५॥
गिरा नाश्वासयस्यद्य स्वां सुताम् इव दुःखितां ।
वीर विक्रान्त धर्मज्ञ सत्यसन्ध महीपते ॥५६॥
यद्यस्यस्मिन् वने राजन् दर्शयात्मानम् आत्मना ।
कदा सुस्निग्धगम्भीरां जीमूतस्वनसन्निभां ॥५७॥
श्रोष्यामि नैषधस्याहं वाचं ताम् अमृतोपमां ।
वैदर्भीत्येव विस्पष्टां शुभां राज्ञो महात्मनः ॥५८॥
आम्नायसारिणीम् ऋद्धां मम शोकविनाशिनीं ।
भीताम् आश्वासयत मां नृपते धर्मवत्सल ॥५९॥

ɔf Vidarbha the protector, conqueror of a host of foes;
ʞnow me of that king the daughter lowly thus approaching thee.
ı Nishadha, mighty Mountain! dwelt the father of my lord,
ligh the name he won, the illustrious Vírasena was he called.
ɔf this king the son, the hero, prosperous and truly brave,
le who rules his father's kingdom by hereditary right,
layer of his foes, dark Nala, Puṇyaśloka is he called;
loly, Veda-read, and eloquent, Soma-quaffing, fire-adoring,
acrificer, liberal giver, warrior, in all points a king,—
f this monarch, best of mountains! know, the wife before thee stands,
allen from bliss, bereft of husband, unprotected, sorrow-doomed,
eeking everywhere her husband, him the best of noblest men.
est of mountains, heaven-upsoaring, with thy hundred stately peaks,
ast thou seen the kingly Nala in this dark and awful wood?
ike the elephant in courage, wise, impetuous, with long arms,
aliant, and of truth unquestioned, my heroic, glorious lord;
ast thou seen Nishadha's sovereign, mighty Nala hast thou seen?
hy repliest thou not, O Mountain, sorrowing, lonely, and distressed,
ith thy voice why not console me as thine own afflicted child?
Hero, mighty, strong in duty, true of promise, lord of earth!
thou art within the forest show thee in thy proper form.
hen so eloquently deep-toned, like the sound of some dark cloud,
all I hear thy voice, oh Nala! sweet as the Amṛita draught,
ying, 'daughter of Vidarbha!' with distinct, with blessed sound,
usical as holy Veda, rich, and soothing all my pain;
us console me, trembling, fainting, thou, oh virtue-loving king!

इति सा तं गिरिश्रेष्ठम् उक्त्वा पार्थिवनन्दिनी ।
दमयन्ती ततो भूयो जगाम दिशम् उत्तरां ॥ ६० ॥
सा गत्वा चीन् अहोरात्रान् ददर्श परमाङ्गना ।
तापसारण्यम् अतुलं दिव्यकाननदर्शनं ॥ ६१ ॥
वशिष्ठभृग्वत्रिसमैस् तापसैर् उपशोभितं ।
नियतैः संयताहारैर् दमशौचसमन्वितैः ॥ ६२ ॥
अब्भक्षैर् वायुभक्षैश्च पर्णाहारैस् तथैव च ।
जितेन्द्रियैर् महाभागैः स्वर्गमार्गदिदृक्षुभिः ॥ ६३ ॥
वल्कलाजिनसंवीतैर् मुनिभिः संयतेन्द्रियैः ।
तापसाध्युषितं रम्यं ददर्शाश्रममण्डलं ॥ ६४ ॥
नानामृगगणैर् जुष्टं शाखामृगगणायुतं ।
तापसैः समुपेतञ्च सा दृष्ट्वैव समाश्वसत् ॥ ६५ ॥
सुभ्रूः सुकेशी सुश्रोणी सुकुचा सुद्विजानना ।
वर्चस्विनी सुप्रतिष्ठा स्वसितायतलोचना ॥ ६६ ॥
सा विवेशाश्रमपदं वीरसेनसुतप्रिया ।
योषिद्रत्नं महाभागा दमयन्ती तपस्विनी ॥ ६७ ॥
साऽभिवाद्य तपोवृद्धान् विनयावनता स्थिता ।
स्वागतं त इति प्रोक्ता तैः सर्वैस् तापसैश्च सा ॥ ६८ ॥
पूजां चास्या यथान्यायं कृत्वा तत्र तपोधनाः ।
आस्यताम् इत्यथोचुस् ते ब्रूहि किं करवामहे ॥ ६९ ॥
तान् उवाच वरारोहा कच्चिद् भगवताम् इह ।
तपस्यग्निषु धर्मेषु मृगपक्षिषु चानघाः ॥ ७० ॥
कुशलं वो महाभागाः स्वधर्माचरणेषु च ।
तैर् उक्ता कुशलं भद्रे सर्वत्रेति यशस्विनि ॥ ७१ ॥
ब्रूहि सर्वानवद्याङ्गि का त्वं किञ्च चिकीर्षसि ।
दृष्ट्वैव ते परं रूपं द्युतिञ्च परमाम् इह ॥ ७२ ॥

To the holiest of mountains spake the daughter of the king.
)amayantí then set forward toward the region of the north.
'hree days long, three nights she wandered, then that noble woman saw
'he unrivalled wood of hermits like to a celestial grove.
'o Vaśishṭha, Bhṛigu, Atri, equal was that sacred crew;
elf-denying, strict in diet, temperate, and undefiled;
Vater-drinking, air-inhaling, and the leaves their simple food;
Iortified, for ever blessed, seeking the right way to heaven;
ark for vests and skins for raiment wore those hermits, sense-subdued.
he beheld the pleasant circle of those hermits' lonely cells;
ound them flocks of beasts were grazing, wantoned there the monkey-tribes.
Vhen she saw those holy dwellings all her courage was revived.
ovely-browed, and lovely-tressed, lovely-bosom'd, lovely-lipp'd,
ı her brightness, in her glory, with her large dark beauteous eyes,
ntered she those hermit-dwellings, wife of Vírasena's son;
earl of women, ever blessed, Damayantí the devout.
ıe those holy men saluting stood with modest form half-bent.
Iail, and welcome!' thus those hermits instant with one voice exclaimed.
ıd those sacred men no sooner had the fitting homage paid,
'ake thy seat,' they said, 'oh lady! and command what we must do.'
ıus replied the slender-waisted, 'Blessed are ye, holy men;
your sacred fires, your worship blameless, with your beasts and birds.
oth the grace of heaven attend you in your duties, in your deeds?'
ıswered they, 'The grace of heaven ever blesses all our deeds.
ıt say thou, of form so beauteous, who thou art, and what thou would'st?
thy noble form we gaze on, on thy brightness as we gaze,

विस्मयो नः समुत्पन्नः समाश्वसिहि मा शुचः ।
अस्यारण्यस्य देवी त्वम् उताहोऽस्य महीभृतः ॥७३॥
अस्याश्च नद्याः कल्याणि वद सत्यम् अनिन्दिते ।
साऽब्रवीत् तान् ऋषीन् नाहम् अरण्यस्यास्य देवता ॥७४॥
न चाप्यस्य गिरेर् विप्रा नैव नद्याश्च देवता ।
मानुषीं मां विजानीत यूयं सर्वे तपोधनाः ॥७५॥
विस्तरेणाभिधास्यामि तन् मे शृणुत सर्वशः ।
विदर्भेषु महीपालो भीमो नाम महीपतिः ॥७६॥
तस्य मां तनयां सर्वे जानीत द्विजसत्तमाः ।
निषधाधिपतिर् धीमान् नलो नाम महायशाः ॥७७॥
वीरः सङ्ग्रामजिद् विद्वान् मम भर्ता विशाम्पतिः ।
देवताभ्यर्चनपरो द्विजातिजनवत्सलः ॥७८॥
गोप्ता निषधवंशस्य महातेजा महाबलः ।
सत्यवाग् अस्त्रवित् प्राज्ञः सत्यसन्धोऽरिमर्दनः ॥७९॥
ब्रह्मण्यो दैवतपरः श्रीमान् परपुरञ्जयः ।
नलो नाम नृपश्रेष्ठो देवराजसमद्युतिः ॥८०॥
मम भर्ता विशालाक्षः पूर्णेन्दुवदनोऽरिहा ।
आहर्ता क्रतुमुख्यानां वेदवेदाङ्गपारगः ॥८१॥
सपत्नानां मृधे हन्ता रविसोमसमप्रभः ।
स कैश्चिन् निकृतिप्रज्ञैर् अनार्यैर् अकृतात्मभिः ॥८२॥
आहूय पृथिवीपालः सत्यधर्मपरायणः ।
देवने कुशलैर् जिह्मैर् जितो राज्यं वसूनि च ॥८३॥
तस्य माम् अवगच्छध्वं भार्यां राजर्षभस्य वै ।
दमयन्तीति विख्यातां भर्तुर् दर्शनलालसां ॥८४॥
सा वनानि गिरींश्चैव सरांसि सरितस् तथा ।
पल्वलानि च सर्वाणि तथाऽरण्यानि सर्वशः ॥८५॥

n amaze we stand and wonder, cheer thee up, and mourn no more.
)f the wood art thou the goddess, or the mountain-goddess thou;
)r the goddess of the river? Blessed Spirit, speak the truth.'
Nor the sylvan goddess am I,' to the Wise she thus replied;
Neither of the mountain, Bráhmans, nor the river-nymph am I.
Know me but a mortal being, O, ye rich in holiness!
ll my tale at length I'll tell you, if meet audience ye will give.
n Vidarbha mighty guardian Bhíma dwells, the lord of earth;
f that noble king the daughter, best of twice-born, know ye me.
nd the monarch of Nishadha, Nala wise and great in fame;
rave in battle, conqueror, prudent is my lord, the peasants' king;
o the gods devout in worship, friendly to the Bráhman race,
f Nishadha's race the guardian, great in glory, great in might,
ue in word, in weapons skilful, wise and slayer of his foes;
ous, heaven-devoted, prosperous, conqueror of hostile towns;
la named, the best of sovereigns, splendid as the king of gods.
now that large-eyed chief, my husband, like the full-orbed moon his face,
ver he of costly offerings, deep in holy volumes read;
yer of his foes in battle, glorious as the sun and moon.
by some most evil-minded, unrespected, wicked men,
er many a challenge yielding, he the virtue-loving king,
these clever gamesters, fraudful, was bereft of realm and wealth.
ow ye me the hapless consort of that noble king of kings,
mayantí, so they name me, yearning for my husband's sight.
rough forests, over mountains, stagnant marsh and river broad,
e with wide pellucid surface, through the long and trackless wood,

अन्वेषमाणा भर्तारं नलं रणविशारदं।
महात्मानं कृतास्त्रञ्च विचरामीह दुःखिता ॥८६॥
कच्चिद् भगवतां रम्यं तपोवनम् इदं नृपः।
भवेत् प्राप्तो नलो नाम निषधानां जनाधिपः ॥८७॥
यत्कृतेऽहम् इदं दुर्गं प्रपन्ना भृशदारुणं।
वनं प्रतिभयं घोरं शार्दूलमृगसेवितं ॥८८॥
यदि कैश्चिद् अहोरात्रैर् न द्रक्ष्यामि नलं नृपं।
आत्मानं श्रेयसा योक्ष्ये देहस्यास्य विमोचनात् ॥८९॥
को नु मे जीवितेनार्थस् तम् ऋते पुरुषर्षभं।
कथं भविष्याम्यद्याहं भर्तृशोकाभिपीडिता ॥९०॥
तथा विलपन्तीम् एकाम् अरण्ये भीमनन्दिनीं।
दमयन्तीम् अथोचुस् ते तापसाः सत्यदर्शिनः ॥९१॥
उदर्कस् तव कल्याणि कल्याणो भविता शुभे।
वयं पश्यामस् तपसा क्षिप्रं द्रक्ष्यसि नैषधं ॥९२॥
निषधानाम् अधिपतिं नलं रिपुनिपातिनं।
भैमि धर्मभृतां श्रेष्ठं द्रक्ष्यसे विगतज्वरं ॥९३॥
विमुक्तं सर्वपापेभ्यः सर्वरत्नसमन्वितं।
तद् एव नगरं भूयः प्रशासतम् अरिन्दमं ॥९४॥
द्विषतां भयकर्तारं सुहृदां शोकनाशनं।
पतिं द्रक्ष्यसि कल्याणि कल्याणाभिजनं नृपं ॥९५॥
एवम् उक्त्वा नलस्येष्टां महिषीं पार्थिवात्मजां।
तापसाऽन्तर्हिताः सर्वे साग्निहोत्राश्रमास् तदा ॥९६॥
सा दृष्ट्वा महद् आश्चर्यं विस्मिता ह्यभवत् तदा।
दमयन्त्यनवद्याङ्गी वीरसेननृपस्नुषा ॥९७॥
किं नु स्वप्नो मया दृष्टः कोऽयं विधिर् इहाभवत्।
क्व नु ते तापसाः सर्वे क्व तद् आश्रममण्डलं ॥९८॥

ver seeking for my husband Nala, skilful in the fight.

lighty in the use of weapons, wander, desolate and sad.

'ell me, to this pleasant sojourn, sacred to these holy men,

Iath he come, the royal Nala? hath Nishadha's monarch come?

'or whose sake through ways all trackless, terrible, have I set forth,

n this drear, appalling forest, where the deer and tiger range,

I see not noble Nala ere few days, few nights are o'er,

to heavenly bliss will join me, from this mortal frame set free.

eft of him, my princely husband, what have I to do with life?

low endure existence longer, for my husband thus distressed?'

o the lady thus complaining, lonely in the savage wood,

nswered thus those holy hermits, spake the gifted seers the truth:—

There will be a time hereafter, beautiful, the time will come,

hrough devotion now we see him, and thou too wilt see him soon;

hat good monarch of Nishadha, Nala, slayer of his foes;

hat dispenser of strict justice, Bhíma's daughter! free from grief,

om all sin released, thou'lt see him glittering in his royal gems,

overning again that city, o'er his enemies supreme.

his foemen causing terror, to his friends allaying grief,

iou, oh noble, shalt thy husband see, that king of noble race!'

the much-loved wife of Nala, to the princess speaking thus,

nished then those holy hermits, with their sacred fires, their cells.

she gazed upon the wonder, wrapt in mute amaze she stood;

mayantí, fair-limbed princess, wife of Vírasena's son:

ave I only seen a vision, what hath been this wondrous chance?

here are all those holy hermits, where the circle of their cells?

क्व सा पुण्यजला रम्या नदी द्विजनिषेविता ।
क्व नु ते ह नगा हृद्याः फलपुष्पोपशोभिताः ॥९९॥
ध्यात्वा चिरं भीमसुता दमयन्ती शुचिस्मिता ।
भर्तृशोकपरा दीना विवर्णवदनाऽभवत् ॥१००॥
सा गत्वाथापरां भूमिं वाष्पसन्दिग्धया गिरा ।
विललापाश्रुपूर्णाक्षी दृष्ट्वाऽशोकतरुं ततः ॥१०१॥
उपगम्य तरुश्रेष्ठम् अशोकं पुष्पितं वने ।
पल्लवापीडितं हृद्यं विहङ्गैर् अनुनादितं ॥१०२॥
अहोवतायम् अगमः श्रीमान् अस्मिन् वनान्तरे ।
आपीडैर् बहुभिर् भाति श्रीमान् पर्वतराड् इव ॥१०३॥
विशोकां कुरु मां क्षिप्रम् अशोक प्रियदर्शन ।
वीतशोक भयाबाधं कच्चित् त्वं दृष्टवान् नृपं ॥१०४॥
नलं नामारिमर्दनं दमयन्त्याः प्रियं पतिं ।
निषधानाम् अधिपतिं दृष्टवान् असि मे प्रियं ॥१०५॥
एकवस्त्रार्धसंवीतं सुकुमारतनुत्वचं ।
व्यसनेनार्दितं वीरम् अरण्यम् इदम् आगतं ॥१०६॥
यथा विशोका गच्छेयम् अशोकनग तत् कुरु ।
सत्यनामा भवाशोक अशोकः शोकनाशनः ॥१०७॥
एवं साऽशोकवृक्षं तम् आर्ता वै परिगम्य ह ।
जगाम दारुणतरं देशं भैमी वराङ्गना ॥१०८॥
सा ददर्श नगान् नैकान् नैकाश्च सरितस् तथा ।
नैकांश्च पर्वतान् रम्यान् नैकांश्च मृगपक्षिणः ॥१०९॥
कन्दरांश्च नितम्बांश्च नदीश्चाद्भुतदर्शनाः ।
ददर्श सा भीमसुता पतिम् अन्वेषती तदा ॥११०॥
गत्वा प्रकृष्टम् अध्वानं दमयन्ती शुचिस्मिता ।
ददर्शाथ महासार्थं हस्त्यश्वरथसङ्कुलं ॥१११॥

here that pure and pleasant river, haunted by the dipping birds?
here those trees with grateful umbrage, with their pendant fruits and flowers?'
ong within her heart she pondered, Damayantí with sweet smile,
or her lord, to grief abandoned, miserable, pale of hue;
another region passed she, there with voice by weeping choked
ourns she, till with eyes o'erflowing an Aśoka tree she saw.
est of trees, the Aśoka blooming, in the forest she approached,
emmed all o'er with glowing fruitage, vocal with the songs of birds.
'Ah, behold, amid the forest flourishes this happy tree,
ith its leafy garlands radiant as the joyous mountain-king.
thou tree with pleasant aspect from my sorrow set me free!
taśoka, hast thou seen him, hast the fearless Rája seen,
la, of his foes the slayer, Damayantí's lord beloved?
st thou seen Nishadha's monarch, hast thou seen mine only love,
d in half a single garment, delicate and soft of skin?
st thou seen th' afflicted hero wandering in this forest lone?
at I may depart ungrieving, fair Aśoka, answer me.
ly be thou named Aśoka, as the extinguisher of grief.'
us in her o'erpowering anguish moved she round the Aśoka tree.
en she went her way in sadness to a region still more dread.
ny a tree she stood and gazed on, many a river passed she o'er;
sed she many a pleasant mountain, many a wild deer, many a bird;
ny a hill and many a cavern, many a bright and wondrous stream,
king Bhíma's wandering daughter as she sought her husband lost.
Long she roamed her weary journey, Damayantí with sweet smile;
a caravan of merchants, elephants, and steeds, and cars,

उत्तरन्तं नदीं रम्यां प्रसन्नसलिलां शुभां ।
सुशान्ततोयां विस्तीर्णां ह्रदिनीं वेतसैर् वृतां ॥११२॥
प्रोद्घुष्टां क्रौञ्चकुररैश् चक्रवाकोपकूजितां ।
कूर्मग्राहझषाकीर्णां पुलिनद्वीपशोभितां ॥११३॥
सा दृष्ट्वैव महासार्थं नलपत्नी यशस्विनी ।
उपसर्प्य वरारोहा जनमध्यं विवेश ह ॥११४॥
उन्मत्तरूपा शोकार्ता तथा वस्त्रार्धसंवृता ।
कृशा विवर्णा मलिना पांशुध्वस्तशिरोरुहा ॥११५॥
तां दृष्ट्वा तत्र मनुजाः केचिद् भीताः प्रदुद्रुवुः ।
केचिच् चिन्तापरास् तस्थुः केचित् तत्र प्रचुक्रुशुः ॥११६॥
प्रहसन्ति स्म तां केचिद् अभ्यसूयन्ति चापरे ।
अकुर्वत दयां केचित् पप्रच्छुश्चापि भारत ॥११७॥
काऽसि कस्यासि कल्याणि किं वा मृगयसे वने ।
त्वां दृष्ट्वा व्यथिताः स्मेह कच्चित् त्वम् असि मानुषी ॥११८॥
वद सत्यं वनस्यास्य पर्वतस्याथवा दिशः ।
देवता त्वं हि कल्याणि त्वां वयं शरणं गताः ॥११९॥
यक्षी वा राक्षसी वा त्वम् उताहोऽसि सुराङ्गना ।
सर्वथा कुरु नः स्वस्ति रक्ष चास्मान् अनिन्दिते ॥१२०॥
यथाऽयं सर्वथा सार्थः क्षेमी शीघ्रम् इतो व्रजेत् ।
तथा विधत्स्व कल्याणि यथा श्रेयो हि नो भवेत् ॥१२१॥
तथोक्ता तेन सार्थेन दमयन्ती नृपात्मजा ।
प्रत्युवाच ततः साध्वी भर्तृव्यसनपीडिता ॥१२२॥
सार्थवाहञ्च सार्थञ्च जना ये तत्र केचन ।
युवस्थविरबालाश्च सार्थस्य च पुरोगमाः ॥१२३॥
मानुषीं मां विजानीत मनुजाधिपतेः सुतां ।
नृपस्नुषां राजभार्यां भर्तृदर्शनलालसां ॥१२४॥

assing o'er a pleasant river, with its waters cool and clear.
'was a still stream broad and waveless, girt about with spreading canes;
here the curlew, there the osprey, there the red-geese clamouring stood;
warmed the turtles, fish and serpents, there rose many a shoal and isle.
When she saw that numerous concourse, Nala's once all-glorious wife,
ntered she, the slender-waisted, in the midst of all the host;
aniac-like in form and feature, and in half a garment clad,
hin and pallid, travel-tainted, matted all her locks with dust.
s they all beheld her standing some in terror fled away;
ome stood still in speechless wonder, others raised their voice and cried;
ocked her some with cruel tauntings, others spake reproachful words;
thers looked on her with pity, and enquired her state, her name.
Who art thou? whose daughter, Lady, in the forest seek'st thou aught?
thy sight we stand confounded, art thou of our mortal race?
this wood art thou the goddess? of this mountain? of that plain?
ho art thou, O noble lady, thee, our refuge, we adore.
t thou sylvan nymph or genius, or celestial nymph divine?
ery way regard our welfare, and protect us, undespised:
our caravan in safety may pursue its onward way,
ordain it, O illustrious! that good fortune wait on all.'
us addressed by that assemblage, Damayantí, kingly-born,
swered thus with gentle language, grieving for her husband lost.
that caravan the leader, and the whole assembled host,
uths and boys, and grey-haired elders, and the guides, thus answered she:
now me, like yourselves, a mortal, daughter of a king of men,
another king the consort seeking for my royal lord;

विदर्भराड् मम पिता भर्ता राजा च नैषधः ।
नलो नाम महाभागस् तम् मार्गाम्यपराजितं ॥१२५॥
यदि जानीथ नृपतिं क्षिप्रं शंसत मे प्रियं ।
नलं पुरुषशार्दूलम् अमित्रगणसूदनं ॥१२६॥
ताम् उवाचानवद्याङ्गीं सार्थस्य महतः प्रभुः ।
सार्थवाहः शुचिर् नाम शृणु कल्याणि मद्वचः ॥१२७॥
अहं सार्थस्य नेता वै सार्थवाहः शुचिस्मिते ।
मनुष्यं नलनामानं न पश्यामि यशस्विनि ॥१२८॥
कुञ्जरद्वीपिमहिषशार्दूलर्क्षमृगान् अपि ।
पश्याम्यस्मिन् वने कृत्स्ने ह्यमनुष्यनिषेविते ॥१२९॥
ऋते त्वां मानुषीं मर्त्ये न पश्यामि महावने ।
तथा नो यक्षराड् अद्य मणिभद्रः प्रसीदतु ॥१३०॥
साऽब्रवीद् वणिजः सर्वान् सार्थवाहञ्च तं ततः ।
क्व नु यास्यति सार्थोऽयम् एतद् आख्यातुम् अर्हसि ॥१३१॥

सार्थवाह उवाच ।

सार्थोऽयं चेदिराजस्य सुबाहोः सत्यदर्शिनः ।
क्षिप्रं जनपदं गन्ता लाभाय मनुजात्मजे ॥१३२॥

॥ इति नलोपाख्याने द्वादशः सर्गः ॥१२॥

Know, Vidarbha's king, my father, and Nishadha's king, my lord,
Iala, is his name, the glorious, him, th' unconquered, do I seek.
Know ye aught of that good monarch, tell me, quick, of my beloved,
f the tiger hero, Nala, slayer of a host of foes.'
Of the caravan the captain thus the lovely-limbed addressed,
ući was his name, the merchant: 'Hear, illustrious queen, my speech;
f this caravan the captain I, O Lady with sweet smile,
im that bears the name of Nala nowhere have these eyes beheld.
ephants, and pards, and tigers, lynxes, buffalos, and bears,
e I in this trackless forest, uninhabited by men;
ve thyself, of human feature, nought of human form, I've seen.
may he, the king of Yakshas, Maṇibhadra, guard us well.'
the merchants all she answered, to the leader of the host:
ell me whither do ye travel? whither bound your caravan?'

THE CAPTAIN OF THE CARAVAN spake:

o the realm of Ćedi's sovereign, truth-discerning Subáhu,
On this caravan will enter, travelling in search of gain.'

END OF BOOK XII.

वृहदश्व उवाच ।

सा तच् छ्रुत्वानवद्याङ्गी सार्थवाहवचस् तदा ।
जगाम सह तेनैव सार्थेन पतिलालसा ॥१॥
अथ काले बहुतिथे वने महति दारुणे ।
तडागं सर्वतोभद्रं पद्मसौगन्धिकं महत् ॥२॥
ददृशुर् वणिजो रम्यं प्रभूतयवसेन्धनं ।
बहुपुष्पफलोपेतं नानापक्षिनिषेवितं ॥३॥
निर्मलस्वादुसलिलं मनोहारि सुशीतलं ।
सुपरिश्रान्तवाहास् ते निवेशाय मनो दधुः ॥४॥
सम्मते सार्थवाहस्य विविशुर् वनम् उत्तमं ।
उवास सार्थः स महान् वेलाम् आसाद्य पश्चिमां ॥५॥
अथार्धरात्रसमये निःशब्दस्तिमिते तदा ।
सुप्ते सार्थे परिश्रान्ते हस्तियूथम् उपागमत् ॥६॥
पानीयार्थं गिरिनदीं मदप्रस्रवणाविलां ।
अथापश्यत सार्थं तं सार्थजान् सुबहून् गजान् ॥७॥
ते तान् ग्राम्यगजान् दृष्ट्वा सर्वे वनगजास् तदा ।
समाद्रवन्त वेगेन जिघांसन्तो मदोत्कटाः ॥८॥
तेषाम् आपततां वेगः करिणां दुःसहोऽभवत् ।
नगाग्राद् इव शीर्णानां शृङ्गाणां पततां क्षितौ ॥९॥
स्यन्दताम् अपि नागानां मार्गा नष्टा वनोद्भवैः ।
मार्गं संरुध्य संसुप्तं पद्मिन्याः सार्थम् उत्तमं ॥१०॥
ते तं ममर्दुः सहसा चेष्टमानं महीतले ।
हाहाकारम् प्रमुञ्चन्तः सार्थिकाः शरणार्थिनः ॥११॥

Vṛihadaśva spake:

This the lovely princess hearing from the captain of the band,
With the caravan set forward, seeking still her royal lord.
Long their journey through the forest, through the dark and awful glens.
Then a lake of loveliest beauty, fragrant with the lotus flowers,
Saw those merchants, wide and pleasant, with fresh grass and fuel rich;
Flowers and fruits bedecked its borders where the birds melodious sang:
In its clear delicious waters, soul-enchanting, icy cool,
With their beasts all overwearied, thought they then to plunge and bathe.
At the signal of the captain entered all that pleasant grove.
At the close of day arriving there encamped they for the night.
When the midnight came, all noiseless came in silence deep and still,
Weary slept the band of merchants, lo, a herd of elephants,
Oozing moisture from their temples, came to drink the troubled stream.
When that caravan they gazed on, with their slumbering beasts at rest,
The tame elephants they scented, those wild forest-elephants;
Forward rush they fleet and furious, mad to slay, and wild with heat;
Irresistible the onset of the rushing ponderous brutes,
As the peaks from some high mountain down the valley thundering roll.
Strewn was all the way before them with the boughs, the trunks of trees;
On they rushed to where the travellers slumbered by the lotus-lake.
Trampled down and vainly struggling, helpless on the earth they lay.
'Woe, oh, woe!' shrieked out the merchants, wildly some began to fly,

वनगुल्मांश्च धावन्तो निद्रान्धा बहवोऽभवन् ।
केचिद् दन्तैः करैः केचित् केचित् पद्भ्यां हता गजैः ॥१२॥
निहतोष्ट्राश्व बहुलाः पदातिजनसङ्कुलाः ।
भयाद् आधावमानाश्च परस्परहतास् तदा ॥१३॥
घोरान् नादान् विमुञ्चन्तो निपेतुर् धरणीतले ।
वृक्षेष्वारुह्य संरब्धाः पतिता विषमेषु च ॥१४॥
एवम् प्रकारैर् बहुभिर् दैवेनाक्रम्य हस्तिभिः ।
राजन् विनिहतं सर्वं समृद्धं सार्थमण्डलं ॥१५॥
आरावः सुमहांश्चासीत् त्रैलोक्यभयकारकः ।
एषोऽग्निर् उत्थितः कष्टस् त्रायध्वं धावताधुना ॥१६॥
रत्नराशिर् विशीर्णोऽयं गृह्णीध्वं किं प्रधावथ ।
सामान्यम् एतद् द्रविणं न मिथ्यावचनं मम ॥१७॥
एवम् एवाभिभाषन्तो विद्रवन्ति भयात् तदा ।
पुनर् एवाभिधास्यामि चिन्तयध्वं सकातराः ॥१८॥
तस्मिंस् तथा वर्तमाने दारुणे जनसङ्क्षये ।
दमयन्ती च बुबुधे भयसन्त्रस्तमानसा ॥१९॥
अपश्यद् वैशसं तत्र सर्वलोकभयङ्करं ।
अदृष्टपूर्वं तद् दृष्ट्वा बाला पद्मनिभेक्षणा ॥२०॥
संसक्तवदनाश्वासा उत्तस्थौ भयविह्वला ।
ये तु तत्र विनिर्मुक्ताः सार्थात् केचिद् अविक्षताः ॥२१॥
तेऽब्रुवन् सहिताः सर्वे कस्येदं कर्मणः फलं ।
नूनं न पूजितोऽस्माभिर् मणिभद्रो महायशाः ॥२२॥
तथा यक्षाधिपः श्रीमान् न वै वैश्रवणः प्रभुः ।
न पूजा विघ्नकर्तॄणाम् अथवा प्रथमं कृता ॥२३॥
शकुनानां फलं वाऽथ विपरीतम् इदं ध्रुवं ।
ग्रहा न विपरीतास्तु किम् अन्यद् इदम् आगतं ॥२४॥

n the forest-thickets plunging; some stood gasping, blind with sleep;
nd the elephants down beat them with their tusks, their trunks, their feet.
Iany saw their camels dying, mingled with the men on foot,
nd in frantic tumult rushing wildly struck each other down;
Iany miserably shrieking cast them down upon the earth,
Iany climbed the trees in terror, on the rough ground stumbled some.
hus in various wise and fatal, by the elephants assailed,
ay that caravan so wealthy, scattered all abroad or slain.
uch, so fearful was the tumult, the three worlds seemed all appalled:
'Tis a fire amid the encampment, save ye, fly ye, for your lives.
o, your precious pearls ye scatter, take them up, why fly so fast?
ve them, 'tis a common venture, fear ye not that I deceive.'
hus t' each other shrieked the merchants as in fear they scattered round.
'et again I call upon you, cowards! think ye what ye do.'
l around this frantic carnage raging through the prostrate host,
mayantí, soon awakened, with her heart all full of dread;
ere she saw a hideous slaughter, the whole world might well appal.
such sights all unfamiliar gazed the queen with lotus-eyes,
ssing in her breath with terror slowly rose she on her feet.
d the few that scaped the carnage, few that scaped without a wound,
at once exclaimed together: 'Of whose deeds is this the doom?
th not mighty Maṇibhadra adoration meet received?
d Vaiśravaṇa the holy, of the Yakshas lord and king,
ve not all that might impede us, ere we journied, been addressed?
s it doomed, that all good omens by this chance should be belied?
re no planets haply adverse? how hath fate, like this, befall'n!'

अपरे त्वब्रुवन् दीना ज्ञातिद्रव्यविनाकृताः ।
याऽसावद्य महासार्थे नारी ह्युन्मत्तदर्शना ॥२५॥
प्रविष्टा विकृताकारा कृत्वा रूपम् अमानुषं ।
तयेयं विहिता पूर्वं माया परमदारुणा ॥२६॥
राक्षसी वा ध्रुवं यक्षी पिशाची वा भयङ्करी ।
तस्याः सर्वम् इदं पापं नात्र कार्या विचारणा ॥२७॥
यदि पश्येम तां पापां सार्थघ्नीं नैकदुःखदां ।
लोष्टभिः पांशुभिश्चैव तृणैः काष्ठैश्च मुष्टिभिः ॥२८॥
अवश्यमेव हन्याम सार्थस्य किल कृत्यकां ।
दमयन्ती तु तच् छ्रुत्वा वाक्यं तेषां सुदारुणं ॥२९॥
ह्रीता भीता च संविग्ना प्राद्रवद् यत्र काननं ।
आशङ्कमाना तत् पापम् आत्मानं पर्यदेवयत् ॥३०॥
अहो ममोपरि विधेः संरम्भो दारुणो महान् ।
नानुबध्नाति कुशलं कस्येदं कर्मणः फलं ॥३१॥
न स्मराम्यशुभं किञ्चित् कृतं कस्यचिद् अण्वपि ।
कर्मणा मनसा वाचा कस्येदं कर्मणः फलं ॥३२॥
नूनं जन्मान्तरकृतं पापम् आपतितं महत् ।
अपश्चिमाम् इमां कष्टाम् आपदं प्राप्नवत्यहं ॥३३॥
भर्तृराज्यापहरणं स्वजनाच्च पराजयः ।
भर्त्रा सह वियोगश्च तनयाभ्याञ्च विच्युतिः ॥३४॥
निर्नाथता वने वासो बहुव्यालनिषेविते ।
अथापरेद्युः सम्प्राप्ते हतशिष्टा जनास् तदा ॥३५॥
देशात् तस्माद् विनिष्क्रम्य शोचन्ते वैशसं कृतं ।
भ्रातरं पितरं पुत्रं सखायञ्च नराधिप ॥३६॥
अशोचत् तत्र वैदर्भी किं नु मे दुष्कृतं कृतं ।
योऽपि मे निर्जनेऽरण्ये सम्प्राप्तोऽयं जनार्णवः ॥३७॥

Others answered in their misery, reft of kindred and of wealth,
Vho is that ill-omened woman, that with maniac-staring eyes,
ined our host, mis-shaped in aspect, and with scarcely human form?
rely all this wicked witchcraft by her evil power is wrought;
itch or sorceress she, or demon, fatal cause of all our fears,
rs is all the guilt, the misery, who such damning proof may doubt?
uld we but behold that false one, murderess, bane of all our host,
ith the clods, the dust, the bamboos, with our staves, or with our fists,
e would slay her on the instant, of our caravan the fate.'
t no sooner Damayantí their appalling words had heard,
her shame and in her terror to the forest shade she fled.
d that guilt imputed dreading thus her fate began to wail:
Voe is me, still o'er me hovers the terrific wrath of fate;
good fortune e'er attends me, of what guilt is this the doom?
t a sin can I remember, not the least to living man.
in deed, or thought, or language, of what guilt is this the doom?
some former life committed expiate I now the sin;
this infinite misfortune hence by penal justice doomed.
t my husband, lost my kingdom, from my kindred separate;
arate from noble Nala, from my children far away,
lowed of my rightful guardian, in the serpent-haunted wood.'
Of that caravan at morning then the sad surviving few,
ing forth from that dread region, o'er that hideous carnage grieve;
h a brother mourns, or father, or a son, or dearest friend.
Vidarbha's princess uttered: 'What the sin that I have done?
rcely in this desert forest had I met this host of men,

स हतो हस्तियूथेन मन्दभाग्याद् ममैव तत् ।
प्राप्तव्यं सुचिरं दुःखं नूनम् अद्यापि वै मया ॥ ३८ ॥
नाप्राप्तकालो म्रियते श्रुतं वृद्धानुशासनं ।
यद् नाहम् अद्य मृदिता हस्तियूथेन दुःखिता ॥ ३९ ॥
न ह्यदैवं कृतं किञ्चिन् नराणाम् इह विद्यते ।
न च मे बालभावेऽपि किञ्चित् पापकृतं कृतं ॥ ४० ॥
कर्मणा मनसा वाचा यद् इदं दुःखम् आगतं ।
मन्ये स्वयंवरकृते लोकपालाः समागताः ॥ ४१ ॥
प्रत्याख्याता मया तत्र नलस्यार्थाय देवताः ।
नूनं तेषां प्रभावेन वियोगं प्राप्तवत्यहम् ॥ ४२ ॥
एवमादीनि दुःखार्ता सा विलप्य वराङ्गना ।
प्रलापानि तदा तानि दमयन्ती पतिव्रता ॥ ४३ ॥
हतशेषैः सह तदा ब्राह्मणैर् वेदपारगैः ।
अगच्छद् राजशार्दूल चन्द्रलेखेव शारदी ॥ ४४ ॥
गच्छन्ती सा चिराद् बाला पुरम् आसादयद् महत् ।
सायाह्ने चेदिराजस्य सुबाहोः सत्यदर्शिनः ॥ ४५ ॥
अथ वस्त्रार्धसंवीता प्रविवेश पुरोत्तमं ।
तां विह्वलां कृशां दीनां मुक्तकेशीम् अमार्जितां ॥ ४६ ॥
उन्मत्ताम् इव गच्छन्तीं ददृशुः पुरवासिनः ।
प्रविशन्तीं तु तां दृष्ट्वा चेदिराजपुरीं तदा ॥ ४७ ॥
अनुजग्मुस् तत्र बाला ग्रामिपुत्राः कुतूहलात् ।
सा तैः परिवृताऽगच्छत् समीपं राजवेश्मनः ॥ ४८ ॥
तां प्रासादगताऽपश्यद् राजमाता जनैर् वृतां ।
धात्रीम् उवाच गच्छैनाम् आनयेह ममान्तिकं ॥ ४९ ॥
जनेन क्लिश्यते बाला दुःखिता शरणार्थिनी ।
तादृग् रूपञ्च पश्यामि विद्योतयति मे गृहं ॥ ५० ॥

y the elephants they perish, this is through my luckless fate;
still lengthening life of sorrow I henceforth must sadly lead.
re his destined day none dieth, this of aged seers the lore;
herefore am not I too trampled by this herd of furious beasts.
very deed of living mortal by o'er-ruling fate is done.
t no sin have I committed, in my blameless infancy,
deserve this dire disaster, or in word, or deed, or thought.
r the choosing of my husband are the guardians of the world,
gry are the gods? rejected for the noble Nala's sake,
om my lord this long divorcement through their power do I endure.'
us the noblest of all women to bewail her fate began,
e deserted Damayantí, with these sad and bitter words.
ith some Veda-reading Bráhmans that survived that scattered host,
en she went her way in sadness, like the young autumnal moon.
ndering long, a mighty city that afflicted queen drew near:
as the king of Ćedi's city, truth-discerning Subáhu.
ntly clad in half a garment entered she that stately town.
r disturbed, emaciate, wretched, with dishevelled hair, unwashed,
e a maniac, onward-moving, saw that city's wondering throng.
zing on her as she entered to the monarch's royal seat;
the city boys her footsteps followed in their curious play;
cled round by these she wandered near the royal palace-gate.
m the lofty palace-terrace her the mother of the king
, and thus her nurse addressed she, 'Go, and lead that wanderer in!
she roves, without a refuge, troubled by those gazing men.
in form so bright, irradiate, is our palace where she moves;

उन्मत्तवेशा कल्याणी श्रीर् इवायतलोचना ।
सा जनं वारयित्वा तं प्रासादतलम् उत्तमं ॥५१॥
आरोप्य विस्मिता राजन् दमयन्तीम् अपृच्छत ।
एवमप्यसुखाविष्टा बिभर्षि परमं वपुः ॥५२॥
भासि विद्युद् इवाभ्रेषु शंस मे काऽसि कस्य वा ।
न हि ते मानुषं रूपं भूषणैर् अपि वर्जितं ॥५३॥
असहाया नरेभ्यश्च नोद्विजस्यमरप्रभे ।
तच् छ्रुत्वा वचनं तस्या भैमी वचनम् अब्रवीत् ॥५४॥
मानुषीं मां विजानीहि भर्तारं समनुव्रतां ।
सैरन्ध्रीं जातिसम्पन्नां भुजिष्यां कामवासिनीं ॥५५॥
फलमूलाशनाम् एकां यत्रसायम्प्रतिश्रयां ।
असङ्ख्येयगुणो भर्ता माञ्च नित्यम् अनुव्रतः ॥५६॥
भक्ताऽहम् अपि तं वीरं छायेवानुगता पथि ।
तस्य दैवात् प्रसङ्गोऽभूद् अतिमात्रं स्म देवने ॥५७॥
द्यूते स निर्जितश्चैव वनम् एक उपेयिवान् ।
तम् एकवसनं वीरम् उन्मत्तम् इव विह्वलं ॥५८॥
आश्वासयन्ती भर्तारम् अहमप्यगमं वनं ।
स कदाचिद् वने वीरः कस्मिंश्चित् कारणान्तरे ॥५९॥
क्षुत्परीतस्तु विमनास् तदप्येकं व्यसर्जयत् ।
तम् एकवसना नग्नम् उन्मत्तवद् अचेतसं ॥६०॥
अनुव्रजन्ती बहुला न स्वपामि निशास् तदा ।
ततो बहुतिथे काले सुप्ताम् उत्सृज्य मां क्वचित् ॥६१॥
वाससोऽर्धं परिच्छिद्य त्यक्तवान् माम् अनागसं ।
तं मार्गमाणा भर्तारं दह्यमाना दिवानिशं ॥६२॥
साऽहं कमलगर्भाभम् अपश्यन्ती हृदि प्रियं ।
न विन्दाम्यमरप्रख्यं प्रियं प्राणेश्वरं प्रभुं ॥६३॥

hough so maniac-like, half-clothed, like Heaven's long-eyed queen she seems.'
hen the nurse those men dispersing, quickly to the palace-top
ade her mount, and in amazement her the mother-queen addressed:
Thus though bowed and worn with sorrow such a shining form thou wear'st,
s through murky clouds the lightning; tell me who thou art and whose:
or thy form is more than human, of all ornament despoiled:
en thou fear'st not, unattended, in celestial beauty safe.'
Hearing thus her gentle language Bhíma's daughter made reply:
Know me like thyself a mortal, a distressed, devoted wife;
f illustrious race a handmaid, making where I will mine home;
n the roots and wild-fruits feeding, lonely, at the fall of eve.
ifted with unnumber'd virtues is my true, my faithful lord,
nd I still the hero followed, like his shadow on the way.
was his fate, with desp'rate fondness, to pursue the love of play,
nd in play subdued and ruined entered he yon lonely wood.
im, arrayed in but one garment, like a madman wandering wild,
console my noble husband I too entered the deep wood.
e within that dreary forest from some accidental cause,
ild with hunger, reft of reason, that one single robe he lost.
with but one robe, him naked, frantic, and with mind diseased,
llowing through the boundless forest, many a night I had not slept.
en, when I had sunk to slumber, me the blameless leaving there,
lf my garment having severed, he his sinless consort fled.
eking him, my outcast husband, day and night am I consumed:
m I see not, ever shining, like the lotus-cup, beloved;
d him not, most like th' immortals, lord of all, my life, my soul.'

ताम् अश्रुपरिपूर्णाक्षीं विलपन्तीं तथा बहु ।
राजमाताऽब्रवीद् आर्तां भैमीम् आर्ततरा स्वयं ॥६४॥
वसस्व मयि कल्याणि प्रीतिर् मे परमा त्वयि ।
मृगयिष्यन्ति ते भद्रे भर्तारं पुरुषा मम ॥६५॥
अपि वा स्वयम् आगच्छेत् परिधावन् इतस्ततः ।
इहैव वसती भद्रे भर्तारम् उपलप्स्यसे ॥६६॥
राजमातुर् वचः श्रुत्वा दमयन्ती वचोऽब्रवीत् ।
समयेनोत्सहे वस्तुं त्वयि वीरप्रजायिनि ॥६७॥
उच्छिष्टं नैव भुञ्जीयां न कुर्यां पादधावनं ।
न चाहं पुरुषान् अन्यान् प्रभाषेयं कथञ्चन ॥६८॥
प्रार्थयेद् यदि मां कश्चिद् दण्ड्यस् ते स पुमान् भवेत् ।
बध्यश्च तेऽसकृन् मन्द इति मे व्रतम् आहितं ॥६९॥
भर्तुर् अन्वेषणार्थन्तु पश्येयं ब्राह्मणान् अहं ।
यद्य् एवम् इह कर्तव्यं वत्स्याम्यहमसंशयं ॥७०॥
अतोऽन्यथा न मे वासो वर्तते हृदये क्वचित् ।
तां प्रहृष्टेन मनसा राजमातेदमब्रवीत् ॥७१॥
सर्वम् एतत् करिष्यामि दिष्ट्या ते व्रतम् ईदृशं ।
एवम् उक्त्वा ततो भैमीं राजमाता विशाम्पते ॥७२॥
उवाचेदं दुहितरं सुनन्दां नाम भारत ।
सैरन्ध्रीम् अभिजानीष्व सुनन्दे देवरूपिणीं ॥७३॥
वयसा तुल्यतां प्राप्ता सखी तव भवत्वियं ।
एतया सह मोदस्व निरुद्विग्नमनाः सदा ॥७४॥
ततः परमसंहृष्टा सुनन्दा गृहम् आगमत् ।
दमयन्तीम् उपादाय सखीभिः परिवारिता ॥७५॥

॥ इति नलोपाख्याने त्रयोदशः सर्गः ॥१३॥

Even as thus, with eyes o'erflowing, uttered she her sad lament,
d herself, sad Bhíma's daughter did the mother-queen address:
)well with me, then, noble Lady, deep the joy in thee I feel,
d the servants of my household shall thy royal husband seek.
aply hither he may wander as he roams about the world;
velling here in peace and honour thou thy husband wilt rejoin.'
To the king of Ćedi's mother Damayantí made reply:
n these terms will I live with thee, mother of heroic sons—
at I eat not broken victuals, wash not feet with menial hand;
r with stranger men have converse, in my chaste, secluded state.
that any man demand me, be he punished; if again,
ath-doomed be the wretch on th' instant, this the vow that I have sworn.
ly, if they seek my husband, holy Bráhmans will I see.
my terms by thee accepted, gladly will I sojourn here,
t on other terms no sojourn will this heart resolved admit.'
Then to her with joyful spirit spake the mother of the king:
s thou wilt shall all be ordered, be thou blest, since such thy vow.'
aking thus to Bhíma's daughter did the royal mother then
these words address her daughter,. young Sunandá was her name:
e this handmaid, my Sunandá, gifted with a form divine;
in age thy lovely compeer, be she to thee as a friend;
ned with her in sweet communion, take thy pleasure without fear.'
ng Sunandá, all rejoicing, to her own abode went back,
ing with her Damayantí, circled with her virgin peers.

End of Book XIII.

वृहदश्व उवाच ।

उत्सृज्य दमयन्तीं तु नलो राजा विशाम्पते ।
ददर्श दावं दह्यन्तं महान्तं गहने वने ॥१॥
तत्र शुश्राव शब्दं वै मध्ये भूतस्य कस्यचित् ।
अभिधाव नलेत्युच्चैः पुण्यश्लोकेति चासकृत् ॥२॥
मा भैर् इति नलश्चोक्त्वा मध्यम् अग्नेः प्रविश्य तं ।
ददर्श नागराजानं शयानं कुण्डलीकृतं ॥३॥
स नागः प्राञ्जलिर् भूत्वा वेपमानो नलं तदा ।
उवाच मां विद्धि राजन् नागं कर्कोटकं नृप ॥४॥
मया प्रलब्धो महर्षिर् नारदः स महातपाः ।
तेन मन्युपरीतेन शप्तोऽस्मि मनुजाधिप ॥५॥
तिष्ठ त्वं स्थावर इव यावद् एव नलः क्वचित् ।
इतो नेता हि तत्र त्वं शापाद् मोक्ष्यसि मत्कृतात् ॥६॥
तस्य शापाद् न शक्तोऽस्मि पदाद् विचलितुं पदं ।
उपदेक्ष्यामि ते श्रेयस् त्रातुम् अर्हति मां भवान् ॥७॥
सखा च ते भविष्यामि मत्समो नास्ति पन्नगः ।
लघुश्च ते भविष्यामि शीघ्रम् आदाय गच्छ मां ॥८॥
एवम् उक्त्वा स नागेन्द्रो बभूवाङ्गुष्ठमात्रकः ।
तं गृहीत्वा नलः प्रायाद् देशं दावविवर्जितं ॥९॥
आकाशदेशम् आसाद्य विमुक्तं कृष्णवर्त्मना ।
उत्स्रष्टुकामं तं नागः पुनः कर्कोटकोऽब्रवीत् ॥१०॥
पदानि गणयन् गच्छ स्वानि नैषध कानिचित् ।
तत्र तेऽहं महाबाहो श्रेयो धास्यामि यत् परं ॥११॥

Vṛihadaśva spake:

amayantí when deserting royal Naḷa fled, ere long
azing in the forest jungle he a mighty fire beheld;
ence, as of a living being, from the midst a voice he heard:
Iasten, Nala!' oft and loudly, 'Puṇyaśloka, haste,' it cried.
'ear thou not,' king Nala answered, plunging in the ruddy flame;
ere he saw the King of Serpents lying, coiled into a ring.
ere with folded hands the Serpent trembling, thus to Nala spake:
Ie, Karkoṭaka, the Serpent know, thou sovereign of men;
rada, the famous hermit, I deceived, the holy sage;
in righteous indignation smote me with this awful curse:
y thou there as one unmoving till king Nala passing by
d thee hence; save only Nala, none can free thee from this curse.
rough this potent execration I no step have power to move;
he way to bliss will show thee, if thou sav'st me from this fate.
ill show thee noble friendship, Serpent none is like to me;
htly shall I weigh, uplift me in thy hand, with speed, O king.'
is when spake the King of Serpents to a finger's size he shrank;
n when Nala lightly lifted to the unburning space he passed.
the air all cool and temperate brought him, by the flame unreached.
he fain on th' earth would place him, thus Karkoṭaka began:
ove thou now, O king, and slowly, as thou movest, count thy steps.
n the best of all good fortune will I give thee, mighty armed!'

ततः सङ्ख्यातुम् आरब्धम् अदशद् दशमे पदे ।
तस्य दष्टस्य तद्रूपं क्षिप्रम् अन्तरधीयत ॥१२॥
स दृष्ट्वा विस्मितस् तस्थाव् आत्मानं विकृतं नलः ।
स्वरूपधारिणं नागं ददर्श च महीपतिः ॥१३॥
ततः कर्कोटको नागः सान्त्वयन् नलम् अब्रवीत् ।
मया तेऽन्तर्हितं रूपं न त्वां विद्युर् जना इति ॥१४॥
यत्कृते चासि निकृतो दुःखेन महता नल ।
विषेण स मदीयेन त्वयि दुःखं निवत्स्यति ॥१५॥
विषेण संवृतैर् गात्रैर् यावत् त्वां न विमोक्ष्यति ।
तावत् त्वयि महाराज दुःखं वै स निवत्स्यति ॥१६॥
अनागा येन निकृतस् त्वम् अनर्हो जनाधिप ।
क्रोधाद् असूययित्वा तं रक्षा मे भवतः कृता ॥१७॥
न ते भयं नरव्याघ्र दंष्ट्रिभ्यः शत्रुतोऽपि वा ।
ब्रह्मर्षिभ्यश्च भविता मत्प्रसादाद् नराधिप ॥१८॥
राजन् विषनिमित्ता च न ते पीडा भविष्यति ।
सङ्ग्रामेषु च राजेन्द्र शश्वज् जयम् अवाप्स्यसि ॥१९॥
गच्छ राजन् इतः सूतो वाहुकोऽहम् इति ब्रुवन् ।
समीपम् ऋतुपर्णस्य स हि वेदाक्षनैपुणं ॥२०॥
अयोध्यां नगरीं रम्याम् अद्य वै निषधेश्वर ।
स तेऽक्षहृदयं दाता राजाश्वहृदयेन वै ॥२१॥
इक्ष्वाकुकुलजः श्रीमान् मित्रञ्चैव भविष्यति ।
भविष्यसि यदाऽक्षज्ञः श्रेयसा योक्ष्यसे तदा ॥२२॥
समेष्यसि च दारैस् त्वं मास्म शोके मनः कृथाः ।
राज्येन तनयाभ्याञ्च सत्यम् एतद् ब्रवीमि ते ॥२३॥
स्वरूपञ्च यदा द्रष्टुम् इच्छेथास् त्वं नराधिप ।
संस्मर्तव्यस् तदा तेऽहं वासश्चेदं निवासयेः ॥२४॥

e the tenth step he had counted, him the sudden Serpent bit:
s he bit him, on the instant all his kingly form was changed.
ere he stood and gazed in wonder, Nala, on his altered form.
his proper shape the Serpent saw the sovereign of men.
en Karkoṭaka the Serpent thus to Nala comfort spake:
'hrough my power thy form is altered, lest thou should'st be known of men.
e through whom thou'rt thus afflicted, Nala, with intensest grief,
rough my poison, shall in anguish ever dwell within thy soul.
his body steeped in poison till he free thee from thy woe,
ll he dwell within thee prison'd in the ecstacy of pain.
from him, by whom, thou blameless! sufferest such unworthy wrong,
the curse I lay upon him thy deliverance shall be wrought.
r not thou the tusked wild boar, foeman fear not thou, O king,
ther Bráhman fear, nor Sages, safe through my prevailing power.
g, this salutary poison gives to thee nor grief nor pain;
he battle, chief of Rájas, victory is ever thine.
thou forth, thyself thus naming, 'Váhuka, the charioteer,'
he royal Ṛituparṇa, in the dice all-skilful he;
Ayodhyá's pleasant city, sovereign of Nishadha! go;
his skill in dice will give thee for thy skill in taming steeds:
kshváku's noble lineage he will be thy best of friends.
n the skill in dice possessing soon wilt rise again to bliss;
n thy consort reunited yield not up thy soul to grief.
n thy kingdom, thou thy children wilt regain, the truth I speak.
n again thou would'st behold thee in thy proper form, O king,
mon me to thy remembrance, and this garment put thou on:

अनेन वाससाच्छन्नः स्वरूपं प्रतिपत्स्यसे ।
इत्युक्त्वा प्रददौ तस्मै दिव्यं वासोयुगं तदा ॥२५॥
एवं नलञ्च सन्दिश्य वासो दत्त्वा च कौरव ।
नागराजस् ततो राजंस् तत्रैवान्तरधीयत ॥२६॥

॥ इति नलोपाख्याने चतुर्दशः सर्गः ॥१४॥

वृहदश्व उवाच ।

तस्मिन् अन्तर्हिते नागे प्रययौ नैषधो नलः ।
ऋतुपर्णस्य नगरं प्राविशद् दशमेऽहनि ॥१॥
स राजानम् उपातिष्ठद् वाहुकोऽहम् इति ब्रुवन् ।
अश्वानां वाहने युक्तः पृथिव्यां नास्ति मत्समः ॥२॥
अर्थकृच्छ्रेषु चैवाहं प्रष्टव्यो नैपुणेषु च ।
अन्नसंस्कारम् अपि च जानाम्यन्यैर् विशेषतः ॥३॥
यानि शिल्पानि लोकेऽस्मिन् यच्चैवान्यत् सुदुष्करं ।
सर्वं यतिष्ये तत् कर्तुम् ऋतुपर्ण भरस्व मां ॥४॥

ऋतुपर्ण उवाच ।

वस वाहुक भद्रं ते सर्वम् एतत् करिष्यसि ।
शीघ्रयाने सदा वुद्धिर् ध्रियते मे विशेषतः ॥५॥
स त्वम् आतिष्ठ योगं तं येन शीघ्रा हया मम ।
भवेयुर् अश्वाध्यक्षोऽसि वेतनं ते शतं शताः ॥६॥
त्वाम् उपस्थास्यतश्चैव नित्यं वार्ष्णेयजीवलौ ।
एताभ्यां रंस्यसे सार्धं वस वै मयि वाहुक ॥७॥
एवम् उक्तो नलस् तेन न्यवसत् तत्र पूजितः ।
ऋतुपर्णस्य नगरे सहवार्ष्णेयजीवलः ॥८॥

this garment clad resum'st thou instantly thy proper form.'

ying thus, of vests celestial gave he to the king a pair.

d king Nala, thus instructed, gifted with these magic robes,

stantly the King of Serpents vanished from his sight away.

End of Book XIV.

Vṛihadaśva spake:

nished thus the King of Serpents set Nishadha's Rája forth,

tuparṇa's royal city on the tenth day entered he.

aight before the royal presence, 'Váhuka am I,' he said,

the skill of taming horses on the earth is not my peer;

e me, where the arduous counsel, where thou want'st the dexterous hand;

the art of dressing viands I am skilful above all.

atsoe'er the art, whatever be most difficult to do,

ill strive to execute it, take me to thy service, king.'

Ṛituparṇa spake:

áhuka, I bid thee welcome, all this service shalt thou do,

my horses' rapid motion deeply is my mind engaged.

e thou then on thee the office, that my steeds be fleet of foot,

my horse be thou the master, hundred hundreds is thy pay:

r shalt thou have for comrades Várshṇeya and Jívala:

h these two pursue thy pleasure, Váhuka, abide with me.'

s addressed, did Nala, honoured by king Ṛituparṇa long,

h Várshṇeya in that city and with Jívala abide:

स वै तत्रावसद् राजा वैदर्भीम् अनुचिन्तयन् ।
सायं सायं सदा चेमं श्लोकम् एकं जगाद ह ॥९॥
क्व नु सा क्षुत्पिपासार्ता श्रान्ता शेते तपस्विनी ।
स्मरन्ती तस्य मन्दस्य कं वा साऽद्योपतिष्ठति ॥१०॥
एवं ब्रुवन्तं राजानं निशायां जीवलोऽब्रवीत् ॥११॥
काम् इमां शोचसे नित्यं श्रोतुम् इच्छामि वाहुक ।
आयुष्मन् कस्य वा नारी याम् एवम् अनुशोचसि ॥१२॥
तम् उवाच नलो राजा मन्दप्रज्ञस्य कस्यचित् ।
आसीद् बहुमता नारी तस्यादृढतरं वचः ॥१३॥
स वै केनचिद् अर्थेन तया मन्दो व्ययुज्यत ।
विप्रयुक्तः स मन्दात्मा भ्रमत्यसुखपीडितः ॥१४॥
दह्यमानः स शोकेन दिवारात्रम् अतन्द्रितः ।
निशाकाले स्मरंस् तस्याः श्लोकम् एकं स्म गायति ॥१५॥
स विभ्रमन् महीं सर्वां क्वचिद् आसाद्य किञ्चन ।
वसत्यनर्हस् तद्दुःखं भूय एवानुसंस्मरन् ॥१६॥
सा तु तं पुरुषं नारी कृच्छ्रेऽप्यनुगता वने ।
त्यक्ता तेनाल्पपुण्येन दुष्करं यदि जीवति ॥१७॥
एका बालाऽनभिज्ञा च मार्गाणाम् अतथोचिता ।
क्षुत्पिपासापरीताङ्गी दुष्करं यदि जीवति ॥१८॥
श्वापदाचरिते नित्यं वने महति दारुणे ।
त्यक्ता तेनाल्पभाग्येन मन्दप्रज्ञेन मारिष ॥१९॥
इत्येवं नैषधो राजा दमयन्तीम् अनुस्मरन् ।
अज्ञातवासं न्यवसद् राज्ञस् तस्य निवेशने ॥२०॥

॥ इति नलोपाख्याने पञ्चदशः सर्गः ॥१५॥

ere abode he, sadly thinking of Vidarbha's daughter still.
the evening, every evening uttered he this single verse;
Vhere is she, by thirst and hunger worn, and weary, pious still,
inking of her unwise husband, in whose presence is she now?'
us the Rája, ever speaking, Jívala one night addressed;
Vho is she, for whom thou grievest? Váhuka, I fain would hear.
o may be the lady's husband? tell me—length of days be thine!'
swered thus the royal Nala, 'To a man of sense bereft,
ce belonged a peerless lady, most infirm of word was he;
m some cause from her dissevered went that frantic man away,
his foolish soul thus parted wanders he, by sorrow racked;
y and night, and still for ever by his parching grief consumed:
htly brooding o'er his sorrows sings he this sad single verse.
r the whole wide earth a wanderer, chance-alighting in some place,
ells that woful man, unworthy, ever wakeful with his grief.
that noble lady following, in the forest lone and dread,
es, of that bad man forsaken, hard it is to say, she lives!
e, and young, the ways unknowing, undeserving of such fate,
s she there with thirst and hunger, hard it is to say, she lives.
hat vast and awful forest, haunted by fierce beasts of prey,
la, she roams forsaken by that hapless senseless lord.'
s remembering Damayantí did Nishadha's king unknown
g within that dwelling sojourn, in the palace of the king.

End of Book XV.

वृहदश्व उवाच ।

हृतराज्ये नले भीमः सभार्ये प्रेष्यतां गते ।
द्विजान् प्रस्थापयामास नलदर्शनकाङ्क्षया ॥१॥
सन्दिदेश च तान् भीमो वसु दत्त्वा च पुष्कलं ।
मृगयध्वं नलं यूयं दमयन्तीञ्च मे सुतां ॥२॥
अस्मिन् कर्मणि सम्पन्ने विज्ञाते निषधाधिपे ।
गवां सहस्रं दास्यामि यो वस् ताव् आनयिष्यति ॥३॥
अग्रहारांश्च दास्यामि ग्रामं नगरसम्मितं ।
न चेच् छक्याव् इहानेतुं दमयन्ती नलोऽपि वा ॥४॥
ज्ञातमात्रेऽपि दास्यामि गवां दश शतं धनं ।
इत्युक्तास् ते ययुर् हृष्टा ब्राह्मणाः सर्वतो दिशं ॥५॥
पुरराष्ट्राणि चिन्वन्तो नैषधं सह भार्यया ।
नैव क्वापि प्रपश्यन्ति नलं वा भीमपुत्रिकां ॥६॥
ततश् चेदिपुरीं रम्यां सुदेवो नाम वै द्विजः ।
विचिन्वानोऽथ वैदर्भीम् अपश्यद् राजवेश्मनि ॥७॥
पुण्याहवाचने राज्ञः सुनन्दासहितां स्थितां ।
मन्दं प्रख्यायमानेन रूपेणाप्रतिमेन तां ।
निबद्धां धूमजालेन प्रभाम् इव विभावसोः ॥८॥
तां समीक्ष्य विशालाक्षीम् अधिकं मलिनां कृशां ।
तर्कयामास भैमीति कारणैर् उपपादयन् ॥९॥

सुदेव उवाच ।

यथेयं मे पुरा दृष्टा तथारूपेयम् अङ्गना ।
कृतार्थोऽस्म्यद्य दृष्ट्वेमां लोककान्ताम् इव श्रियं ॥१०॥

Vṛihadaśva spake:

la thus bereft of kingdom with his wife to slavery sunk,
th king Bhíma sent the Bráhmans, Nala through the world to seek.
us the royal Bhíma charged them, with abundant wealth supplied:—
o ye now and seek king Nala, Damayantí seek, my child:
d, achieved this weighty business, found Nishadha's royal lord,
ich of you shall hither bring them shall a thousand kine receive;
d a royal grant for maintenance of a village like a town.
or hither Damayantí nor king Nala may be brought,
ow ye where they are, rich guerdon still we give, ten hundred kine.'
s addressed, the joyful Bráhmans went to every clime of earth,
ough the cities, through the kingdoms, seeking Nala and his queen:
a, or king Bhíma's daughter, in no place might they behold.
n a Bráhman, named Sudeva, came to pleasant Ćedi-pur;
re within the kingly palace he Vidarbha's daughter saw,
ding with the fair Sunandá, on a royal holiday.
h her beauty once so peerless worthy now of little praise,
e the sun-light feebly shining through the dimness of a cloud.
ing on the large-eyed princess, dull in look, and wasted still,
he thought, king Bhíma's daughter, pondering thus within his mind.—

Sudeva spake:

as once I wont to see her, such is yonder woman's form,
y work have done, beholding, like the goddess world-adored,

पूर्णचन्द्रनिभां श्यामां चारुवृत्तपयोधरां ।
कुर्वन्तीं प्रभया देवीं सर्वा वितिमिरा दिशः ॥११॥
चारुपद्मविशालाक्षीं मन्मथस्य रतीम् इव ।
इष्टां समस्तलोकस्य पूर्णचन्द्रप्रभाम् इव ॥१२॥
विदर्भसरसस् तस्माद् दैवदोषाद् इवोद्धृतां ।
मलपङ्कानुलिप्ताङ्गीं मृणालीम् इव चोद्धृतां ॥१३॥
पौर्णमासीम् इव निशां राहुग्रस्तनिशाकरां ।
पतिशोकाकुलां दीनां शुष्कस्रोतां नदीम् इव ॥१४॥
विध्वस्तपर्णकमलां वित्रासितविहङ्गमां ।
हस्तिहस्तपरामृष्टां व्याकुलाम् इव पद्मिनीं ॥१५॥
सुकुमारीं सुजाताङ्गीं रत्नगर्भगृहोचितां ।
दह्यमानाम् इवार्केण मृणालीम् इव चोद्धृतां ॥१६॥
रूपौदार्यगुणोपेतां मण्डनार्हाम् अमण्डितां ।
चन्द्रलेखाम् इव नवां व्योम्नि नीलाभ्रसंवृतां ॥१७॥
कामभोगैः प्रियैर् हीनां हीनां बन्धुजनेन च ।
